
Cover Page

DOI: http://ijmer.in.doi./2023/12.05.19
www.ijmer.in

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:5(1), May: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd May 2023
Publication Date:1st June 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

# वास्तुशास्त्रानुसारेण ग्रामवासविचारः

**डा. कृष्णकुमारभार्गवः**
**सहायकाचार्यः, ज्योतिष-वास्तुविभागः**
**राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः**

**सारांशः** - मानवकल्याणाय विद्यन्ते अस्माकं शास्त्राणि । तेषु शास्त्रेषु अन्यतमं भवति वास्तुशास्त्रम् । वास्तुशास्त्रे न केवलं गृहनिर्माणस्य अपितु प्रासाद-राजप्रासाद-नगर-जलाशयादि विषयाणां सर्वेऽपि सिद्धान्ताः प्रतिपादिताः वर्तन्ते । तत्र गृहनिर्माणे अनेके विषयाः विचारणीयाः भवन्ति तेषु मुख्यत्वेन ग्रामवासविचारोऽपि भवति । वास्तुशास्त्राधारेण ग्रामवासविचारः कथं क्रियते इत्यस्य केचन विधयः प्रस्तुत शोधपत्रे प्रतिपादिताः ।

**कूटशब्दाः** –काकिणी, नराकारचक्रम्, ग्रामवासविचारः, शिवाबलिः ।

## वास्तुशास्त्रस्य सङ्क्षिप्तपरिचयः -

**"वसन्त्यस्मिन्निति वास्तु"** इति परिभाषया निवासार्थकात् वस् धातोः तुण् प्रत्यये कृते सति निष्पद्यते "वास्तु" शब्दः । यस्य अर्थः निवासः वासः वा इति । यदा अनियोजितं भूखण्डं सुनियोजितं रूपं दत्त्वा निवासयोग्यं भवति तदा वास्तु इति । यत्र मानवः वसति तत्र मानवसम्बन्धी वास्तु । गृहं, मन्दिरं, ग्रामः, नगरम् इत्यादयः मानवसम्बन्धिनः वास्तुभेदाः सन्ति । यस्मिन् शास्त्रे पञ्चमहाभूतानां समन्वयः, प्राकृतिकशक्तीनां प्रबन्धनम्, आवासीय-व्यवसायिकधार्मिकक्रियाकलापानां सम्पादनाय भवननिर्माणार्थं सिद्धान्तानां विधिप्रविधिनां प्रतिपादनं क्रियते तस्य समग्रसंकलनं "वास्तुशास्त्रम्" कथ्यते । आचार्यविश्वकर्मानुसारं यत्र देवाः, मनुष्याः, गजः, गोः, अश्वाः इत्यादयः पशवः निवसन्ति, तत्र वास्तु इति कथ्यते यथा-

**देवतानां नराणां च गजगोवाजिनामपि ।**
**निवासभूमिश्शल्पज्ञैर्वास्तुसंज्ञमुदीरितम् ॥**[1]

यदि वयं वास्तुशास्त्रस्य ऐतिहासिकपरम्परायाः अनुसरणं कुर्मः तर्हि वर्तमानस्य वास्तुविज्ञानस्य मूलं वेदेषु एव वर्तते इति स्पष्टम् । अतः वेदविषये सर्वतोभावेन् प्रामाणिकता सामान्यजनेषु प्रचलति। भारतीय वास्तुकला मानवसभ्यता इव पुरातनम् अस्ति । वस्तुतः वास्तुशास्त्रस्य उत्पत्तिस्थानं वेदमात्रम् एव । वास्तुशास्त्रस्य ऋग्वेदे उल्लेखः अस्ति यथा –

**वास्तोष्पते प्रति जानीह्यस्मान्स्वावेशो अनमीवो भवा नः ।**
**यत् त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे ॥**[2]

---

[1]विश्वकर्मवास्तुशास्त्रम् - अध्यायः ७ - श्लोकः १
[2]ऋग्वेद -७/५४/१

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:5(1), May: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd May 2023
Publication Date:1st June 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

DOI: http://ijmer.in.doi./2023/12.05.19
www.ijmer.in

अस्य मन्त्रस्य इदं तात्पर्यम् – हे वास्तोष्पते ! अस्माकं गृहे ये ये निवसन्ति तान् सर्वान् रोगविहीनान् करोतु । अस्माकं गृहसम्बद्धान् द्विपदानां चतुष्पदां च सर्वेषां कल्याणं करोतु इति ।

वेदविहितं वास्तुशास्त्रस्वरूपम् –




एवमेव वेदाङ्गेषु अपि वास्तुशास्त्रस्य स्वरूपम् -




उपर्युक्तभेदानुसारं वास्तशास्त्रस्य अपि त्रिधा भेदः भवति- १. देववास्तु २. राजवास्तु ३. लोकवास्तु शिल्पं च। पौराणिकसाहित्ये यदि वास्तुशास्त्रस्य अध्ययनं कुर्मः तर्हि प्रायः सर्वेषु पुराणेषु वास्तुशास्त्रस्य वर्णनं प्राप्यते इति ज्ञायते । मत्स्यपुराणे, अग्निपुराणे, स्कन्दपुराणे, गरुडपुराणे, विष्णुधर्मोत्तरपुराणे च विशेषतया वास्तुवर्णनं प्राप्यते ।

Cover Page

DOI: http://ijmer.in.doi./2023/12.05.19
www.ijmer.in

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:5(1), May: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd May 2023
Publication Date:1st June 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

**वास्तुशास्त्रानुसारेण ग्रामवासविचारः -** ग्राम- मनुष्ययोः अन्योन्याश्रयसम्बन्धः वर्तते। सर्वे ग्रामाः सर्वेषां कृते वासाय शुभाः न भवन्ति। केषाञ्चन जनानां कृते केचन ग्रामाः वासार्थं शुभाः भवन्ति, केचन ग्रामाः शुभाः न भवन्ति। अतः यस्मिन् कस्मिन्नपि ग्रामे वासार्थं गृहनिर्माणकरणात्प्राग् "एषः ग्रामः मम कृते वासार्थं योग्यः भवति वा?" इति परीक्षणीयम्। यदि वासार्थं सः ग्रामः योग्यः भवति तर्हि तत्र गृहनिर्माणं कृत्वा वासः करणीयः। यदि सः ग्रामः वासार्थं योग्यः नास्ति तर्हि कः ग्रामः मम कृते वासार्थं योग्यः अस्तीति परीक्षणं कृत्वा कः ग्रामः योग्यः इति निर्णीतः तस्मिन् ग्रामे गृहनिर्माणं कृत्वा वासः कार्यः। इत्युक्ते यस्मिन् ग्रामे व्यक्तिः निवसितुं गच्छति सः ग्रामः तस्य कृते शुभफलदायकः वा अशुभफलदायकः एतस्य चिन्तनं वास्तुशास्त्रे विस्तृतरूपेण कृतः अस्ति। यतोहि वास्तुशास्त्रे गृहारम्भात्प्राग्विचारणीयांशानां विषये उक्तमस्ति यत् –

**ग्रामादेरनुकूलत्वं दिशो भूतग्रहस्य च।**
**गृहधिष्ण्यादिकं शुद्धं वीक्ष्यायव्ययमंशकान्॥**
**सुगेहं रचयेद्धीमान् वास्तुशास्त्रानुसारतः।**[3]

अर्थात् गृहनिर्माणविचारप्रसङ्गे सर्वादौ ग्रामस्य आनुकूल्यं चिन्तनीयं ततः परं भूमेः आनुकूल्यं ततः परं पिण्ड-आय-वार-नक्षत्रादिविमर्शमाध्यमेन गृहनिर्माणं कर्तव्यम्। अतः सर्वादौ ग्रामस्य शुभाशुभत्वं विचार्यते। गृहनिर्माणार्थं ग्रामस्य योग्यायोग्यत्वनिर्णये वास्तुशास्त्रे बहवः प्रकाराः उक्ताः सन्ति। तेषु केचन प्रमुखविधयः वर्तन्ते तद्यथा -

1- नराकारचक्रमाध्यमेन ग्रामवासविचारः।
2- शिवाबलि-विधिमाध्यमेन ग्रामवासविचारः।
3- वर्गविचारः।
4- काकिणी-माध्यमेन ग्रामवासविचारः।
5- राश्यानुसारेण ग्रामवासविचारः।
6- राश्यानुसारेण ग्रामे निषिद्धस्थानम्।

**1- नराकारचक्रमाध्यमेन ग्रामवासविचारः** - ग्रामवासविचारक्रमे अन्यतमः विधिः भवति नराकारचक्रम्। अनेन विधिना ग्रामस्य शुभाशुभत्वं विचार्यते। तद्यथा -

**मस्तके पञ्चलाभाय मुखे त्रीणि धनक्षयः। कुक्षौ पञ्च धनं धान्यं षट्पादे स्त्रीदरिद्रता॥**
**पृष्ठे चैकं पादहानिर्नाभौ चत्वारि संम्पदः। गुह्ये चैकं भयं पीडां हस्ते चैकन्तु क्रन्दनम्॥**
**वामे चैकं करे भेदो ग्रामचक्रं नराकृतिः। गणयेज्जन्मनक्षत्रं ग्रामनक्षत्रतस्सदा॥**[4]

अर्थात् ग्रामस्य नक्षत्रात् (ग्रामनामनक्षत्रात्) मानवस्य (यः तस्मिन् ग्रामे वसितुम् इच्छति तस्य मानवस्य) जन्मनक्षत्रस्य आधारेण नराकृतिचक्रस्य निर्माणं क्रियते।अत्र ग्रामनक्षत्रात् जन्मनक्षत्रं यावत् गणना क्रियते। अनेन आधारेण शुभाशुभत्वस्य विचारः क्रियते। तत्र आदौ क्रमशः ५ नक्षत्राणि शिरसि नराकारचक्रे स्थाप्यन्ते एतस्य फलं हितकरं भवति अर्थात् यदि ग्रामनक्षत्रात् मानवस्य नक्षत्रं प्रथमेषु ५ नक्षत्रेषु भवन्ति चेत् तस्मिन् ग्रामे वासः लाभदायकः भवति, ततः परं त्रीणी नक्षत्राणि मुखे प्रतिष्ठितानि, तेषां फलं धनक्षयः इति, तदनन्तरं ५ नक्षत्राणि उदरे धनं ददति, ततः ६ नक्षत्राणि चरणे प्रतिष्ठितानि, तानि स्त्रीहानिं कुर्वन्ति, तदनन्तरं पृष्ठभागे एकं नक्षत्रं, यत् पादहानिं जनयति, ततः परं बाह्यनाभौ चत्वारि

---
[3]वास्तुरत्नाकरः 1/11

[4]बृहदवास्तुमाला, श्लोक सं. 10-12

Cover Page

DOI: http://ijmer.in.doi./2023/12.05.19
www.ijmer.in

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:5(1), May: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd May 2023
Publication Date:1st June 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

नक्षत्राणि, गुह्यक्षेत्रे एकं नक्षत्रं भयङ्करं, ततः दक्षिणहस्ते एकं नक्षत्रं दुःखदं वामहस्ते एकं नक्षत्रं च दुःखदायकम् । निम्नलिखितचक्रद्वारा एतस्य स्पष्टज्ञानं कर्तुं शक्यतेतद्यथा -

**नराकारचक्रम्**

| स्थानम् | शिरः | मुखम् | कुक्षिः (उदरम् ) | चरणौ | पृष्ठभागः | नाभिः | गुह्यम् | दक्षिण-हस्तः | वाम-हस्तः |
|---|---|---|---|---|---|---|---|---|---|
| ग्रामनक्षत्रात् मानवनक्षत्रसंख्या (27 नक्षत्राणि) | 5 (1-5 नक्षत्राणि) | 3 (6-8 नक्षत्राणि) | 5 (9-13 नक्षत्राणि) | 6 (14-19 नक्षत्राणि) | 1 (20 तमं नक्षत्रम्) | 4 (21-24 नक्षत्राणि) | 1 (25 तमं नक्षत्रम्) | 1 (26 तमं नक्षत्रम्) | 1 (27 तमं नक्षत्रम्) |
| फलम् | लाभः (शुभम् ) | धनक्षयः (अशुभम्) | धनधान्यः (शुभम् ) | स्त्रीहानिः (अशुभम्) | पादहानिः (अशुभम्) | संपतिः (शुभम् ) | भयम् (अशुभम्) | पीडा (अशुभम्) | क्रन्दनम् (अशुभम्) |

**उदाहरणम्-** कश्चनमानवः मोहननामधेयः अमरावतीनगरे वासः कर्तुं इच्छति चेत् नराकारचक्राधारेण सः ग्रामः (नगरम्) मोहनस्य कृते शुभं वा अशुभं वा भविष्यति एतस्य ज्ञानं अनेन कर्तुं शक्यते यथा अमरावतीनामकस्य ग्रामस्य (नगरस्य) नक्षत्रं कृत्तिका, मोहननामकस्य मनुष्यस्य नक्षत्रं पूर्वाफाल्गुनी, कृतिकानक्षत्रात् पूर्वा फाल्गुनीनक्षत्रसङ्ख्या नव भवति, अतः मोहनस्य स्थानं नराकारचक्रे कुक्षौ अस्ति। यस्य फलं धनधान्यं (शुभं) अस्ति, अतः अमरावतीनगरं मोहननामकस्य व्यक्तेः कृते धनधान्यदायकं अर्थात् शुभदायकं भविष्यति।

**2. <u>शिवाबलि-विधिमाध्यमेन ग्रामवासविचारः</u>** - वास्तुशास्त्रे ग्रामविचारप्रसङ्गे अनेके विधयः सन्ति, तेषु एकः प्राचीनः विधिः शिवाबलिः इत्यपि अस्ति, अस्य विधेः अनुसारं ग्रामवासविचारः एवं क्रियते तद्यथा -

**निशीथे निर्जने देशे भक्तं मांसादिसंयुतम् । भूमौ निधाय विधिवद् दूरं गत्वा विचिन्तयेत् ॥**

**ईशाने मरणं प्रोक्तं चोत्तरे कुरु सर्वतः । वासं वायव्यकोणेषु भयं किञ्चित्प्रजायते ॥**

**पश्चिमे वासकरणादानन्दः परिकीर्तितः । नैऋत्ये हि शिवा रौति तदावासं न कारयेत् ॥**

**दक्षिणे रौति कल्याणं वह्निकोणे भयं महा । पूर्वेप्युच्चाटनं ज्ञेयं कलिर्वा रिपुभिस्सह ॥**

**अष्टदिक्षु यदा रौति तदा वासं न कारयेत् । निश्शब्दे सर्वलाभः स्यादिति गर्गादिभाषितम् ॥**[5]

अर्थात् यस्मिन् ग्रामे वासं कर्तुम् इच्छा अस्ति तस्मिन् ग्रामे अर्धरात्रौ निर्जनदेशे एकान्तस्थाने मांसादियुक्ततण्डुलानि (तण्डुलानि) संस्थाप्य विधिवत् दूरं गत्वा शृगालस्य रवः कस्याः दिशः आगच्छति इति श्रोतव्यम् । यदि ईशानतः शृगालस्य रवः श्रूयते चेत् तस्मिन् ग्रामे वासः मरणप्रदः भवति । पूर्वतः शृगालस्य ध्वनिः श्रूयते चेत् तस्मिन् ग्रामे वासः क्रियते चेत्

[5]बृहदवास्तुमाला, श्लोक सं. 13-16


Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:5(1), May: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd May 2023
Publication Date:1st June 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

DOI: http://ijmer.in.doi./2023/12.05.19
www.ijmer.in

ग्रामादुच्चाटनं भवति अथवा शत्रुकलहः भवति । आग्नेयकोणात् शृगालस्य ध्वनिः श्रूयते चेत् तस्मिन् ग्रामे वासः क्रियते चेत् महद्भयं सम्भवति । दक्षिणदिशः शृगालध्वनिः श्रूयते चेत् तद्ग्रामे वासः कल्याणप्रदः भवति । नैऋत्यत्यकोणतः शृगालध्वनिः श्रूयते चेत् तद्ग्रामे वासः अशुभदायकः भवति । पश्चिमदिशः शृगालध्वनिः श्रूयते चेत् तस्मिन्न् ग्रामे वासः आनन्ददायकः भवति । वायव्यदिशः श्रृगालरवः श्रूयते चेत् तस्मिन् ग्रामे वासः अल्पभयं जनयति । उत्तरदिशः श्रृगालरवः श्रूयते चेत् तस्मिन् ग्रामे वासः शुभं जनयति । अष्टभ्यः दिग्भ्यः श्रृगालरवः श्रूयते चेत् तस्मिन् ग्रामे वासः अशुभदः भवति । कस्याः अपि दिशः शृगालरवः न श्रुतः चेत् तस्मिन् ग्रामे वासः अतिशुभदः भवति ।यथा चक्रस्य माध्यमेन –

| दिशा | पूर्वा | आग्नेया | दक्षिणा | नैर्ऋत्या | पश्चिमा | वायव्या | उत्तरा | ईशान्या | अष्टदिक् | नि:शब्द: |
|---|---|---|---|---|---|---|---|---|---|---|
| **फलम्** | उच्चाटनम् शत्रुकलह: (अशुभम्) | महाभयम् (अशुभम्) | कल्याणम् (शुभम्) | अशुभम् | आनन्द: (शुभम्) | अल्पभयम् (सामान्य-फलम्) | शुभम् | मरणम् | अशुभम् | शुभम् |

**3- वर्गविचारः-** अ, क, च, ट, ट, प, य, श इत्येते अष्टवर्गाः भवन्ति । समग्रा वर्णमाला अष्टसु वर्गेषु विभक्ता भवति । एषु अष्टसु वर्गेषु वर्णमालायाः सर्वे वर्णा (अक्षराणि) अन्तर्गता भवन्ति ।इत्येषां अष्टवर्गाणां अधिपाः क्रमशः गरुडः, विडालः (बिडालः), सिंहः, स्वानः (कुक्कुरः), सर्पः, मूषकः, मृगः, मेषश्च सन्ति । एते क्रमशः पूर्वादिक्षु बलिनः भवन्ति अर्थात् पूर्वे अवर्गः, आग्नेयकोणे कवर्गः, दक्षिणे चवर्गः, नैऋत्यकोणे टवर्गः, पश्चिमे तवर्गः, वायव्यकोणे पवर्गः, उत्तरे यवर्गः, ईशान्ये शवर्गः बलिनः भवन्ति । एषु अष्टसु वर्गाधिपप्राणिषु प्रत्येकं प्राणी स्वात् पञ्चमवर्गेशप्राणिनः शत्रुः भवति । यथा - गरुडात् पञ्चमवर्गेशः सर्पः । सर्पात्पञ्चमवर्गेशः गरुडः । अतः गरुडसर्पयोः मिथः शत्रुता इत्यवगन्तव्यम् । इत्थं मार्जार-मूषकयोः, सिंह-मृगयोः, शुनक-मेषयोश्च शत्रुता ज्ञेया । अनेन ग्रामनामवर्गात् मानवस्य वर्गः पञ्चमः न भवेत्। यथोक्तं बृहद्वास्तुमालायाम् -

**वर्गाष्टकस्य पतयो गरुडो बिडालः सिंहस्तथैव शुनकोरगमूषकैणाः ।**
**मेषः क्रमेण गदिताः खलु पूर्वतोऽपि यः पञ्चमः स रिपुरेव बुधैर्विवर्ज्यः ॥[6]**

सारणीद्वारा स्पष्टं वर्णनं यथा –

| वर्गसङ्ख्या | वर्गाः | वर्गाक्षराणि | दिशः | वर्गाधिपाः |
|---|---|---|---|---|
| 1. | अ | अ, आ, इ, ई,औ, ऊ, ऋ, ॠ, ऌ, ए, ऐ, ओ, औ, अं, अः | पूर्वा | गरुडः |
| 2. | क | क, ख, ग, घ, ङ | आग्नेया | मार्जारः |
| 3. | च | च, छ, ज, झ, ञ | दक्षिणा | सिंहः |
| 4. | ट | ट, ठ, ड, ढ, ण | नैर्ऋत्या | शुनकः |
| 5. | त | त, थ, द, ध, न | पश्चिमा | सर्पः |
| 6. | प | प, फ, ब, भ, म | वायव्या | मूषकः |
| 7. | य | य, र, ल, व | उत्तरा | मृगः |
| 8. | श | श, ष, स, ह, ळ | ईशान्या | मेषः |

[6]बृहदवास्तुमाला, श्लोक सं. 17


Cover Page

DOI: http://ijmer.in.doi./2023/12.05.19
www.ijmer.in

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:5(1), May: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd May 2023
Publication Date:1st June 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

एतस्या: वर्गसारिण्या: उपयोगः काकिणीविचारे अपि भवति।

**4- काकिणी-माध्यमेन ग्रामवासविचार: -**

गृहस्यैव सम्पूर्णकार्येऽपि द्यूते
पुनर्भूर्विवाहे च वर्गस्य शुद्धौ ।
तथा काकिणीवादयोर्वै विचारे
नरस्यैव नाम्नः प्रकुर्यात् विधिज्ञः ॥[7]

वास्तुशास्त्रानुसारेण यस्मिन् ग्रामे मानवः निवसितुम् इच्छति तस्य शुभत्वम् अशुभत्वं वा आदौ चिन्त्यते, इत्युक्ते यस्मिन् ग्रामे व्यक्तिः निवसितुं गच्छति सः ग्रामः तस्य कृते शुभफलदायकः वा अशुभफलदायकः एतस्य चिन्तनं वास्तुशास्त्रे विस्तृतरूपेण कृतः अस्ति। गृहनिर्माणार्थं ग्रामस्य योग्यायोग्यत्वनिर्णये वास्तुशास्त्रे बहवः प्रकाराः उक्ताः सन्ति। तेषु प्रकारेषु काकिणीविचारः प्रधानः भवति। उपर्युक्तानाम् अष्टानां वर्गाणाम् अनुसारेण ग्राम-मनुष्ययोः काकिणीविचारः परीक्ष्यते। काकिणी नाम प्राचीनकाले व्यवहारार्थं प्रचलितम् एकं नाणकम्। विंशतिवराटकाभिः एका काकिणी भवति। यथोक्तं लीलावत्यां श्रीमता भास्करेण - "वराटकानां दशकद्वयं यत्सा काकिणी" इति। अत्र काकिणीविचारः इति उपलक्षणेन काकिणीशब्दः स्वीकृतः। काकिणीशब्देन सम्पदः यः कोऽपि प्रकारः ग्रहीतुं शक्यः। ग्राम-मनुष्ययोः सम्बन्धः उत्तमः भवति वेति परीक्षयितुं काकिणीविचारः किमर्थं द्रष्टव्यः इति सन्देहः स्वाभाविकः। धनं विना जीवितुं न शक्नुमः। अतः यदि काकिणीविचारस्य परीक्षणेन यदि आनुकूल्यमागच्छति तर्हि तस्मिन् ग्रामे वासेन जीवननिर्वहणार्थम् आवश्यकाः धनधान्यादिसम्पदः प्राप्यन्ते, अतः सः ग्रामः वासार्थं योग्यः इत्यर्थः। यदि प्रातिकूल्यमागच्छति तर्हि तस्मिन् ग्रामे वासेन अस्माकं सम्पदः नष्टः भूत्वा ऋणभारः अस्माकमुपरि पतिष्यति, अतो सः ग्रामः वासार्थमयोग्यः इत्यवगन्तव्यम्। अत एव यस्मिन् कस्मिन्नपि ग्रामे वासगृहनिर्माणात्प्राक् ग्राम-मनुष्ययोः काकिणीविचारः अवश्यं द्रष्टव्यः। अत्र मनुष्यः नाम यः गृहनिर्माणं कर्तुमिच्छति सः। काकिणीविचारः कथं द्रष्टव्यः इति बृहद्वास्तुमालायाम् इत्थं निरूपितम् -

स्ववर्गं द्विगुणं कृत्वा परवर्गेण योजयेत्।
अष्टभिस्तु हरेद्भागं योऽधिकः स ऋणी भवेत् ॥[8]

ग्रामस्य नाम तथा मनुष्यस्य नाम लेखनीयः। उभयोरपि नाम्नः प्रथमाक्षरः उपर्युक्तेषु अष्टसु वर्गेषु कस्मिन् वर्गे आगच्छतीति द्रष्टव्यम्। ग्राम-मनुष्ययोः उभयोरपि वर्गसङ्ख्यां पृथक् पृथक् द्विगुणीकृत्य परवर्गेण साकं संयोज्य अष्टभिः विभजेत्। तदानीं ये शेषे स्तः ते पृथक् पृथक् ग्राममनुष्ययोः काकिणीसङ्ख्ये भवतः। यस्य काकिणी अधिका भवति सः ऋणी भवेत् इत्यर्थः। अत्र स्ववर्गः नाम ग्राममनुष्ययोर्मध्ये यस्य काकिणी विचार्यते तस्य वर्गः। ग्रामस्य काकिणी विचार्यते चेत् ग्रामस्य वर्गः, मनुष्यस्य काकिणी विचार्यते चेत् मनुष्यस्य वर्गः इत्यर्थः। परवर्गः नाम यस्य काकिणी विचार्यते तदितरस्य वर्गः। ग्रामस्य काकिणी विचार्यते चेत् मनुष्यस्य वर्गः, मनुष्यस्य काकिणी विचार्यते चेत् ग्रामस्य वर्गः इत्यर्थः।

अस्यायमभिप्रायः। ग्रामस्य नाम्नः प्रथमाक्षरस्य वर्गसङ्ख्यां द्विगुणीकृत्य मनुष्यस्य (यः तस्मिन् ग्रामे गृहं निर्मातुमिच्छति तस्य) नाम्नः प्रथमाक्षरस्य वर्गसङ्ख्यया संयोज्य अष्टभिर्विभजेत्। तदानीं यच्छेषमागच्छति तद् मनुष्यस्य काकिणीसङ्ख्या भवति। पुनः मनुष्यस्य नाम्नः प्रथमाक्षरस्य वर्गसङ्ख्यां द्विगुणीकृत्य ग्रामस्य नाम्नः प्रथमाक्षरस्य वर्गसङ्ख्यया साकं संयोज्य अष्टभिर्विभजेत्। तदानीं यच्छेषमागच्छति तत् मनुष्यस्य काकिणीसङ्ख्या भवति। ग्रामस्य काकिणी अधिका चेत् ग्रामः ऋणी भवेत्। मनुष्यस्य काकिणी अधिका चेत् मनुष्यः ऋणी भवेत्। ग्राम-मनुष्ययोरुभयोरपि काकिण्यौ समाने चेत् यः कोऽपि ऋणी न भवति। अत्र ग्रामः मनुष्यस्य कृते ऋणी चेत् सः ग्रामः वासार्थं योग्यः इत्यर्थः। यतो हि तदानीं सः ग्रामः एव मनुष्यस्य कृते केनापि प्रकारेण धनसम्पदादिकं प्रयच्छति। मनुषः ग्रामस्य कृते ऋणी भवति चेत् वासार्थं सः ग्रामः सर्वथा अयोग्य एव भवति। यतो हि तदानीं ग्रामः मनुष्यस्य

[7]वास्तुमाणिक्यरत्नाकरः – श्लोकः ५
[8]बृहदवास्तुमाला, श्लोक सं. 18


Cover Page
INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:5(1), May: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd May 2023
Publication Date:1st June 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf
DOI: http://ijmer.in.doi./2023/12.05.19
www.ijmer.in

धनसम्पदादिकं सर्वमपि केनापि प्रकारेण अपहृत्य मनुष्यम् ऋणिनं करोति । अतः ग्रामस्य काकिण्याः अपेक्षया मनुष्यस्य काकिणी न्यूना भवति चेदेव सः ग्रामः वासार्थम् उत्तमः भवति, मनुष्यस्य काकिणी ग्रामस्य काकिण्याः अपेक्षया अधिका चेत् सः ग्रामः वासार्थम् ईषदपि योग्यः न भवति, ग्राममनुष्ययोः काकिण्यौ समाने चेत् तस्मिन् ग्रामे वासेन अधिकः लाभः न प्राप्यते चेदपि जीवननिर्वाहार्थं क्लेशः न भवतीत्यभिप्रायः । अतः ग्रामस्य काकिण्याः अपेक्षया मनुष्यस्य काकिणी न्यूना चेत् अथवा ग्रामस्य काकिण्या मनुष्यस्य काकिणी समाना चेत् तस्मिन् ग्रामे गृहनिर्माणं कर्तुं शक्यते इति तात्पर्यम् ।

$$\frac{(\text{ग्रामनाम्नः प्रथमाक्षरस्य वर्गसङ्ख्या} \times 2) + \text{मनुष्यनाम्नः प्रथमाक्षरस्य वर्गसङ्ख्या}}{8} = \text{शेषं ग्रामस्य काकिणीसङ्ख्या ।}$$

$$\frac{(\text{मनुष्यनाम्नः प्रथमाक्षरस्य वर्गसङ्ख्या} \times 2) + \text{ग्रामनाम्नः प्रथमाक्षरस वर्गसङ्ख्या}}{8} = \text{शेषं मनुष्यस्य काकिणीसङ्ख्या ।}$$

**उदाहरणम् -**

मनुष्यस्य नाम रामनारायणः, ग्रामस्य नाम सूरत् । रामनारायणस्य वासार्थं सूरत् ग्रामः उत्तमः भवति वा न वेति द्रष्टव्यः ।

रामनारायणस्य प्रथमाक्षरः रा । रा इत्येतत् र इति व्यञ्जनस्य गुणिताक्षरम् । र इतीदं यवर्गे अन्तर्भवति । यवर्गस्य सङ्ख्या = 7

ग्रामस्य/नगरस्य नाम = सूरत् । प्रथमाक्षरं सू । सू इत्येतत् स इति व्यञ्जनाक्षरस्य गुणिताक्षरम् । स इत्येतत् शवर्गे अन्तर्भवति । शवर्गस्य सङ्ख्या = 8

$$\frac{(8 \times 2) + 7}{8} = \frac{23}{8} = 2 \text{ लब्धिः, } 7 \text{ शेषम् ।}$$

अतः सूरतस्य काकिणी = 7

$$\frac{(7 \times 2) + 8}{8} = \frac{22}{8} = 2 \text{ लब्धिः, } 6 \text{ शेषम् ।}$$

अतः रामनारायणस्य काकिणी = 6

सूरतस्य काकिण्याः अपेक्षया रामनारायणस्य काकिणी न्यूना भवति । अतः सूरत् ग्रामः/नगरं रामनारायणस्य कृते वासार्थं शुभदायकं भवतीत्यर्थः ।

अनेनैव प्रकारेण यस्य कस्यापि ग्रामस्य, पत्तनस्य, नगरस्य, महानगरस्य, जिल्लायाः, राज्यस्य, देशस्य वा काकिणीविचारं कृत्वा अस्माकं कृते वासार्थं कुत्र शुभदायकं भवतीति ज्ञातुं शक्नुमः ।

**5-राश्यानुसारेण ग्रामवासविचारः -**

**स्वनामराशितो ग्रामराशिर्द्वयङ्केषुदिक्शिवैः ।**
**सम्मितश्चेत्तदा तस्य तद्ग्रामे वास उत्तमः ॥**
**रोगोऽष्टद्वादशे तुर्ये वैरमाद्ये च सप्तमे ।**
**हानिः षष्ठे तृतीये च ग्रामराशौ स्वनामभात् ॥**[9]

स्वकीयव्यवहारनामराशितः ग्रामराशिः 2,5,9,10,11 सम्मितः चेत् सः ग्रामः तस्य मनुष्यस्य कृते वासार्थम् उत्तमः भवतीत्यर्थः । स्वकीयव्यवहारनामराशितः ग्रामराशिः 4,8,12 सम्मितः चेत् तस्मिन् ग्रामे वासः क्रियते चेत् रोगः आगच्छति । स्वकीयव्यवहारनामराशितः ग्रामराशिः 1,7 सम्मितः चेत् तस्मिन् ग्रामे वासः क्रियते चेत् वैरत्वं

[9] वास्तुसारः - वास्तुविधानप्रकरणम् - 27-28 श्लोकौ

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:5(1), May: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd May 2023
Publication Date:1st June 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

DOI: http://ijmer.in.doi./2023/12.05.19
www.ijmer.in

सम्भवति । स्वकीयनामराशितः ग्रामराशिः 3,6 सम्मितः चेत् तस्मिन् ग्रामे वासः क्रियते चेत् हानिः सम्भवति । एवमेव मुहूर्तचिन्तामणौ अपि प्राप्यते यत् – **यद्भं द्वयङ्कसुतेशदिङ्मितमसौ ग्रामः शुभो नामभात् ।**[10]

| राश्यनुसारं नामाक्षराणि | |
|---|---|
| **राशयः** | **नामाक्षराणि** |
| मेषः | चू, चे, चो, ला, ली, लू, ले, लो, अ |
| वृषभः | ई, ऊ, ए, ओ, वा, वी, वू, वे, वो |
| मिथुनम् | का, की, कू, घ, घ, छ, के, को, हा |
| कर्काटकः | ही, हू, हे, हो, डा, डी, डू, डे, डो |
| सिंहः | मा, मी, मू, मे, मो, टा, टी, टू, टे |
| कन्या | टो, पा, पी, ,पू, ष, ण, ठ, पे, पो |
| तुला | रा, री, रू, रे, रो, ता, ती, तू, ते |
| वृश्चिकः | तो, ना, नी, नू, ने, नो, या, यी, यू |
| धनुः | यो, यो, भा, भी, भू, ध, फा, ढा, भे |
| मकरः | भो, जा, जी, खी, खू, खा, खो, गा, गी |
| कुम्भः | गू, गे, गो, सा, सी, सू, से, सो, दा |
| मीनः | दा, दू, थ, झ, ञ, दे, दो, चा, ची |

(चुचेचोलास्तु चाश्विन्यः लीलूलेलो भरण्यपि......... इत्यादिना अश्विन्यादिनक्षत्रपादानां नामाक्षराणि निरूपितानि । मेषादिराशिषु ये ये नक्षत्रपादाः आगच्छन्ति तेषां यानि यानि नामाक्षराणि कथितानि तान्येव मेषादिराशीनां नामाक्षराणीति मन्तव्यम् ।)

## 6-राशिवशात् ग्रामे निषिद्धस्थानानि -

**गोसिंहनक्रमिथुनं निवसेन्न मध्ये, ग्रामस्य पूर्वककुभोऽलिझषाङ्गनाय ।**
**कर्को धनुस्तुलभमेषघटाश्च तद्वद्वर्गाः स्वपञ्चमपरा बलिनः स्युरैन्द्र्याः ॥**[11]

वासार्थं ग्रामस्य अथवा नगरस्य चयनस्य पश्चात् अस्मिन् ग्रामे अथवा नगरे कस्मिन् स्थाने गृहनिर्माणं क्रियते चेत् उत्तमं भवति ? कस्मिन् स्थाने गृहनिर्माणं क्रियते चेत् अशुभं भवतीति वास्तुशास्त्रानुसारं विचारं कर्तव्यम् । मनुष्यस्य नामराश्यनुसारं ग्रामे नगरे वा कुत्र कुत्र वासः निषिद्धः भवतीति वास्तुशास्त्रे चर्चितमस्ति । वृषभ-मिथुन-सिंह-मकरराशिष्वन्यतमं येषां जनानां नामराशिः भवति तेषां कृते ग्रामस्य नगरस्य वा मध्यभागे वासः अशुभाय भवति । येषां नामराशिः वृश्चिकः भवति तेषां कृते ग्रामस्य नगरस्य वा पूर्वभागे वासः अशुभाय भवति । येषां नामराशिः मीनराशिः भवति तेषां कृते ग्रामस्य नगरस्य वा आग्नेयकोणे वासः अशुभाय भवति । येषां नामराशिः कन्याराशिः भवति तेषां कृते ग्रामस्य नगरस्य वा दक्षिणभागे वासः अशुभाय भवति । येषां नामराशिः कर्काटको भवति तेषां कृते ग्रामस्य नगरस्य वा नैर्ऋत्यकोणे वासः अशुभाय भवति । येषां नामराशिः धनूराशिः भवति तेषां कृते ग्रामस्य नगरस्य वा पश्चिमभागे वासः अशुभाय भवति । येषां नामराशिः तुलाराशिः भवति तेषां कृते ग्रामस्य नगरस्य वा वायव्यकोणे वासः अशुभाय भवति । येषां नामराशिः मेषराशिः भवति तेषां कृते ग्रामस्य नगरस्य वा उत्तरभागे वासः अशुभाय भवति । येषां नामराशिः कुम्भराशिः भवति तेषां कृते ग्रामस्य नगरस्य वा ईशान्यकोणे वासः अशुभाय भवति ।

[10] मुहूर्तचिन्तामणिः वास्तुप्रकरणम्- श्लोक-1
[11] मुहूर्तचिन्तामणिः - वास्तुप्रकरणम् - श्लोकः 02

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:5(1), May: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd May 2023
Publication Date:1st June 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

DOI: http://ijmer.in.doi./2023/12.05.19
www.ijmer.in

**राशिवशात् ग्रामे निषिद्धस्थानानां सारिणी**

| | | |
|---|---|---|
| **ईशानकोणः -कुम्भः** | **पूर्वदिशा–वृश्चिकः** | **आग्नेयकोणः-मीनः** |
| **उत्तरदिशा-मेषः** | **ग्राममध्ये –वृषः, मिथुनम्, सिंहः, मकरः** | **दक्षिणदिशा-कन्या** |
| **वायव्यकोण-तुला** | **पश्चिमदिशा-धनुः** | **नैर्ऋत्यकोण-कर्कः** |

**उपसंहारः** - वास्तुशास्त्रे प्राणिनां कल्याणार्थं सिद्धान्ताः प्रतिपादिताः सन्ति। प्रकृतौ विद्यमानानां पञ्चमहाभूतानां भवनेषु कैः प्रकारैः उपयोगः भवतीति सिद्धान्तमनुसृत्य वास्तुशास्त्रे विभिन्नसिद्धान्ताः वर्णिताः सन्ति। एवञ्च वास्तुशास्त्रे कुत्र भवननिर्माणं करणीयम् ? कः ग्रामः नगरं वा वासार्थं मङ्गलदायकं भवति ? इत्यादिविचारान्निरूपयन्ति। अस्मिन् शोधपत्रे ग्रामचयनस्य विविधतत्त्वानि प्रतिपादितानि सन्ति। एतेषां तत्त्वानाम् आधारेण ग्रामस्य चयनानन्तरम् अस्माभिः वास्तुशास्त्रस्य विविधसिद्धान्तानामधारेण भवननिर्माणं क्रियते। उदाहरणार्थं भूमिचयनविधानं, प्रतिकृतिः, विनियोजनं, द्रव्य एवं चयनविधिः, भवनाङ्गं, सज्जा आदि माध्यमेन गृहनिर्माणं क्रियते चेत् निश्चितरूपेण तद्गृहम् अत्यन्तं शुभदायकं भवति इति वक्तुं शक्नुमः। वर्तमानकाले प्रस्तुतविषयस्य सन्दर्भे यदि कोऽपि नरः सर्वकारद्वारा कस्मिंश्चत् स्थाने उद्योगं प्राप्नोति चेत् काकिण्यादभिः विचारैः तेन ग्रामे कस्मिन् भागे वासः कर्तुं शक्यते इति चिन्तनं कर्तुं शक्यते यतो हि शास्त्रे राजाज्ञायाः कृते महत्त्वं स्थानं दत्तमस्ति। परन्तु सामान्यरूपेण व्यापारादिकरणार्थं ग्रामविशेषस्य चयनम् उपर्युक्तविधिनामाधारेण सम्प्रति कालेऽपि कर्तुं शक्यते। येन सः जनः स्वकीयं जीवनम् आनन्दपूर्णेन यापयितुं शक्नोति।

**सन्दर्भग्रन्थसूची** –

1. मुहूर्तचिन्तामणिः ; ग्रन्थकर्ता – रामदैवज्ञः, संस्करणवर्षम् – सा.यु. २०१५, प्रकाशनसंस्था – चौखम्बासुरभारतीप्रकाशनम्, वाराणसी
2. बृहज्जातकम्; ग्रन्थकर्ता – वराहमिहिरः, व्याख्याकारः – केदारदत्त जोशी, संस्करणवर्षम् – सा.यु. २०१३, प्रकाशनसंस्था – मोतीलाल बनारसीदास, वाराणसी
3. बृहत्संहिता – प्रथमो भागः ; ग्रन्थकर्ता – वराहमिहिरः, व्याख्याकारः – पं.अच्युतानन्दझा, संस्करणवर्षम् – सा.यु. २०१४, प्रकाशनसंस्था – चौखम्बाविद्याभवनम्, वाराणसी
4. बृहत्संहिता – द्वितीयो भागः ; ग्रन्थकर्ता – वराहमिहिरः, व्याख्याकारः – पं.अच्युतानन्दझा, संस्करणवर्षम्– सा.यु. २०१४, प्रकाशनसंस्था– चौखम्बाविद्याभवनम्, वाराणसी
5. मनुष्यालयचन्द्रिका; ग्रन्थकर्ता – श्रीनीलकण्ठमूसतः, द्वितीयसंस्करणम्, संस्करणवर्षम् – सा.यु. २०१३, प्रकाशनसंस्था – चौखम्बाकृष्णदासअकादमी, वाराणसी
6. वास्तुरत्नाकरः (अहिबलचक्रसहितः); ग्रन्थकर्ता – श्रीविन्ध्येश्वरीप्रसादद्विवेदी, एकादशतमसंस्करणम्, संस्करणवर्षम् – सा.यु. २०१२, प्रकाशनसंस्था – चौखम्बासंस्कृतसीरीजआफीस्, वाराणसी
7. बृहद्वास्तुमाला; सम्पादकौ – डॉ ॥ ब्रह्मानन्दत्रिपाठी &डॉ ॥ रविशर्मा च, संस्करणम् – सा.यु. २०१६, प्रकाशनसंस्था – चौखम्बासुरभारतीप्रकाशनम्, वाराणसी
8. मयमतम्; ग्रन्थकर्ता – मयमुनिः, प्रकाशनवर्षम् – सा.यु. १९१९, महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन राजकीयमुद्रणालययन्त्रालये तदध्यक्षेण मुद्रयित्वा प्रकाशितम्।
9. समराङ्गणसूत्रधारः; प्रकाशनवर्षम् – १९६५, प्रकाशनसंस्था – भारतभारतिप्रेस्, नवदेहली